শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমন্নিগমান্তমহাদেশিকৈঃ অনুগৃহীতম্

# ॥ শ্রীভগৱদ্ধ্যানসোপানম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীভগৱদ্ধ্যানসোপানম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

অন্তর্জ্যোতিঃ কিমপি যমিনামঞ্জনং যোগদৃষ্টেঃ
    চিন্তারত্নং সুলভমিহ নঃ সিদ্ধিমোক্ষানুরূপম্।
দীনানাথৱ্যসনশমনং দৈৱতং দৈৱতানাং
    দিৱ্যং চক্ষুঃ শ্রুতিপরিষদাং দৃশ্যতে রঙ্গমধ্যে॥ **1** ॥

ৱেলাতীতশ্রুতিপরিমলং ৱেধসাং মৌলিসেৱ্যং
    প্রাদুর্ভূতং কনকসরিতঃ সৈকতে হংসজুষ্টে।
লক্ষ্মীভূম্যোঃ করসরসিজৈর্লালিতং রঙ্গভর্তুঃ
    পাদাম্ভোজং প্রতিফলতি মে ভাৱনাদীর্ঘিকাযাম্॥ **2** ॥

চিত্রাকারাং কটকরুচিভিশ্চারুৱৃত্তানুপূর্ৱাং
    কালে দৃত্যদ্রুততরগতিং কান্তিলীলাকলাচীম্।
জানুচ্ছাযাদ্বিগুণসুভগাং রঙ্গভর্তুর্মদাত্মা
    জঙ্ঘাং দৃষ্টৱা জননপদৱীজাঙ্ঘিকত্ৱং জহাতি॥ **3** ॥

কামারামস্থিরকদলিকাস্তম্ভসম্ভাৱনীযং
    ক্ষৌমাশ্লিষ্টং কিমপি কমলাভূমিনীলোপধানম্।
ন্যঞ্চৎকাঞ্চীকিরণরুচিরং নির্ৱিশত্যূরুযুগ্মং
    লাৱণ্যৌঘদ্ৱযমিৱ মতির্মামিকা রঙ্গযূনঃ॥ **4** ॥

সম্প্রীণাতি প্রতিকলমসৌ মানসং মে সুজাতা
    গম্ভীরত্ৱাৎ ক্ৱচন সমযে গূঢনিক্ষিপ্তৱিশ্ৱা।

নালীকেন স্ফুরিতরজসা ৱেধসো নির্মিমাণা
রম্যাৱর্তদ্যুতিসহচরী রঙ্গনাথস্য নাভিঃ ॥ **5** ॥

শ্রীৱৎসেন প্রথিতৱিভৱং শ্রীপদন্যাসধন্যং
মধ্যং বাহ্ৱোর্মণিৱররুচা রঞ্জিতং রঙ্গধাম্নঃ।
সান্দ্রচ্ছাযং তরুণতুলসীচিত্রযা ৱৈজযন্ত্যা
সন্তাপং মে শমযতি ধিযশ্চন্দ্রিকোদারহারম্ ॥ **6** ॥

একং লীলোপহিতমিতরং বাহুমাজানুলম্বং
প্রাপ্তা রঙ্গে শযিতুরখিলপ্রার্থনাপারিজাতম্।
দৃপ্তা সেযং দৃঢনিযমিতা রশ্মিভির্ভূষণানাং
চিন্তাহস্তিন্যনুভৱতি মে চিত্রমালানযন্ত্রম্ ॥ **7** ॥

সাভিপ্রাযস্মিতৱিকসিতং চারুবিম্বাধরোষ্ঠং
দুঃখাপাযপ্রণযিনি জনে দূরদত্তাভিমুখ্যম্।
কান্তং ৱক্ত্রং কনকতিলকালঙ্কৃতং রঙ্গভর্তুঃ
স্বান্তে গাঢং মম ৱিলগতি স্বাগতোদারনেত্রম্ ॥ **8** ॥

মাল্যৈরন্তঃ স্থিরপরিমলৈর্ৱল্লভাস্পর্শমান্যৈঃ
কুপ্যচ্চোলীৱচনকুটিলৈঃ কুন্তলৈঃ শ্লিষ্টমূলে।
রত্নাপীডদ্যুতিশবলিতে রঙ্গভর্তুঃ কিরীটে
রাজন্ৱত্যঃ স্থিতিমধিগতা ৱৃত্তযশ্চেতসো মে ॥ **9** ॥

পাদাম্ভোজং স্পৃশতি ভজতে রঙ্গনাথস্য জঙ্ঘাম্
ঊরুদ্ৱন্দ্ৱে ৱিলগতি শনৈরূর্ধ্ৱমভ্যেতি নাভিম্।
ৱক্ষস্যাস্তে ৱলতি ভুজযোর্মামিকেযং মনীষা
ৱক্ত্রাভিখ্যাং পিবতি ৱহতে ৱাসনাং মৌলিবন্ধে ॥ **10** ॥

কান্তোদারৈরযমিহ ভুজৈঃ কঙ্কণজ্যাকিণাঙ্কৈঃ
লক্ষ্মীধাম্নঃ পৃথুলপরিঘৈর্লক্ষিতাভীতিহেতিঃ।

অগ্রে কিঞ্চিদ্ভুজগশযনঃ স্বাত্মনৈৱাত্মনঃ সন্
    মধ্যেরঙ্গং মম চ হৃদযে ৱর্ততে সাৱরোধঃ ॥ **11** ॥

রঙ্গাস্থানে রসিকমহিতে রঞ্জিতাশেষচিত্তে
    ৱিদ্বৎসেৱাৱিমলমনসা ৱেঙ্কটেশেন কৢপ্তম্।
অক্লেশেন প্রণিহিতধিযামারুরুক্ষোরৱস্থাং
    ভক্তিং গাঢাং দিশতু ভগৱদ্ধ্যানসোপানমেতৎ॥ **12** ॥

॥ ইতি শ্রীভগৱদ্ধ্যানসোপানং সমাপ্তম্ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ ॥